# ચન્દ્રશેખર અષ્ટક સ્તોત્રમ

## Chandrashekara Ashtaka Stotram

---

ચન્દ્રશેખરઅષ્ટકસ્તોત્રમ |

ચન્દ્રશેખર ચન્દ્રશેખર
ચન્દ્રશેખર પાહિ મામ |
ચન્દ્રશેખર ચન્દ્રશેખર
ચન્દ્રશેખર રક્ષ મામ ||૧||

રત્નસાનુશરાસનં રજતાદ્રિશૃઙ્ગનિકેતનં
સિઞ્જિનીકૃતપન્નગેશ્વરમચ્યુતાનનસાયકમ |
ક્ષિપ્રદગ્ધપુરત્રયં ત્રિદિવાલયૈરભિવન્દિતં
ચન્દ્રશેખરમાશ્રયે મમ કિં કરિષ્યતિ વૈ યમઃ ||૨||

પઞ્ચપાદપપુષ્પગન્ધપદાંબુજદ્વયશોભિતં
ભાલલોચનજાતપાવકદગ્ધમન્મથવિગ્રહમ |
ભસ્મદિગ્ધકલેબરં ભવ નાશનં ભવમવ્યયં
ચન્દ્રશેખરમાશ્રયે મમ કિં કરિષ્યતિ વૈ યમઃ ||૩||

મત્તવારણમુખ્યચર્મકૃતોત્તરીયમનોહરં
પઙ્કજાસનપદ્મલોચનપૂજિતાંઘ્રિસરોરુહમ |
દેવસિન્ધુતરઙ્ગસીકર સિક્તશુભ્રજટાધરં
ચન્દ્રશેખરમાશ્રયે મમ કિં કરિષ્યતિ વૈ યમઃ ||૪||

યક્ષરાજસખં ભગાક્ષહરં ભુજઙ્ગવિભૂષણં
શૈલરાજસુતાપરિષ્કૃતચારુવામકલેબરમ |
ક્ષ્વેડનીલગલં પરશ્વધધારિણં મૃગધારિણં
ચન્દ્રશેખરમાશ્રયે મમ કિં કરિષ્યતિ વૈ યમઃ ||૫||

કુણ્ડલીકૃતકુણ્ડલેશ્વર કુણ્ડલં વૃષવાહનં
નારદાદિમુનીશ્વરસ્તુતવૈભવં ભુવનેશ્વરમ |
અન્ધકાન્તકમાશ્રિતામરપાદપં શમનાન્તકં
ચન્દ્રશેખરમાશ્રયે મમ કિં કરિષ્યતિ વૈ યમઃ ||૬||

ભેષજં ભવરોગિણામખિલાપદામપહારિણં
દક્ષયજ્ઞવિનાશનં ત્રિગુણાત્મકં ત્રિવિલોચનમ |

ભુક્તિમુક્તિફલપ્રદં સકલાઘસંઘનિબર્હણં
ચન્દ્રશેખરમાશ્રયે મમ કિં કરિષ્યતિ વૈ યમઃ ||૭||

ભક્તવત્સલમર્ચિતં નિધિક્ષયં હરિદંબરં
સર્વભૂતપતિં પરાત્પરમપ્રમેયમનુત્તમમ |
સોમવારિદભૂહુતાશનસોમપાનિલખાકૃતિં
ચન્દ્રશેખરમાશ્રયે મમ કિં કરિષ્યતિ વૈ યમઃ ||૮||

વિશ્વસૃષ્ટિવિધાયિનં પુનરેવ પાલનતત્પરં
સંહરન્તમપિ પ્રપઞ્ચમશેષલોકનિવાસિનમ |
કીડયન્તમહર્નિશં ગણનાથયૂથસમન્વિતં
ચન્દ્રશેખરમાશ્રયે મમ કિં કરિષ્યતિ વૈ યમઃ ||૯||

મૃત્યુભીતમૃકણ્ડુસૂનુકૃતસ્તવં શિવસન્નિધૌ
યત્ર કુત્ર ચ યઃ પઠેન્ન હિ તસ્ય મૃત્યુભયં ભવેત |
પૂર્ણમાયુરરોગતામખિલાર્થસંપદમાદરાત
ચન્દ્રશેખર એવ તસ્ય દદાતિ મુક્તિમયત્નતઃ ||૧૦||

ઇતિ શ્રીચન્દ્રશેખરાષ્ટકસ્તોત્રં સંપૂર્ણમ ||

**www.shaivam.org**